शस्त्रव्रातप्रहरणवदत्रापि तथायुक्तत्वात् पारिभाषिकत्वादेव न प्रकरणनियमः ॥*॥
"क्रोधात् प्रायं विषं वह्निं शस्त्रमुद्बन्धनं जलम्।
गिरिवृक्षप्रपातञ्च ये कुर्व्वन्ति नराधमाः ॥
महापातकिनो ये च पतितास्ते प्रकीर्त्तिताः ।
पतितानां न दाहः स्यान्नान्त्येष्टिर्नास्थिसञ्चयः॥
न चाश्रुपातः पिण्डो वा कार्य्यं श्राद्धादिकं क्वचित्
एतानि पतितानाञ्च यः करोति विमोहितः ।
तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा ॥"*॥
तद्विरत्र मरीचिः ।
"विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम् ।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता॥"
इति शुद्धितत्त्वम् ॥

शस्त्रहतचतुर्द्दशी, स्त्री, (शस्त्रहतानां चतुर्द्दशी । युद्धादिहतानां श्राद्धादिकर्म्मणि प्रशस्ततयास्यास्तथात्वम् ।) गौणाश्विनकृष्णचतुर्द्दशी । गौणकार्त्तिककृष्णचतुर्द्दशी च । यथा, लिङ्गपुराणम् ।
"दीपमालां तथा कृष्णचतुर्द्दश्यां शिवाग्रतः ।
चतुष्पथे च नद्याञ्च चत्वरेषु गृहेषु च ।
एकविंशकुलोपेतो वसेच्छिवपुरे नरः ॥"
अत्र शस्त्रहतानामुल्कादानं अन्येषान्तु दर्शे । इति संवत्सरकौमुदी ॥*॥ अन्यच्च । अथ शस्त्रहतचतुर्द्दशी तत्र विष्णुः । युद्धहतानां श्राद्धकर्म्मणि चतुर्द्दशी प्रशस्ता । युद्धहतानामेवेति न नियमार्थमिदम् । ब्रह्मपुराणे ।
"प्रायोऽनशनशस्त्राग्निविषाद्युद्बन्धिनान्तथा ।
चतुर्द्दश्यान्तु कर्त्तव्यं तृप्त्यर्थमिति निश्चयः ॥"
प्रायो महापथगमनम् । वायुपुराणे ।
"युवानस्तु गृहे यस्य मृतास्तेषान्तु दापयेत् ।
शस्त्रेण तु हता ये वै तेषां दद्याच्चतुर्द्दशीम् ॥"
युवान एव पित्रादयो मृता इत्यर्थः । मरीचिः ।
"विषशस्त्रश्वापदाहितिर्य्यग्ब्राह्मणघातिनाम् ।
चतुर्द्दश्यां क्रिया कार्य्या अन्येषान्तु विगर्हिता॥
ब्राह्मणकृतघातोऽस्यास्तीति ब्राह्मणघाती ये च वै ब्राह्मणैर्हता इति ब्रह्मपुराणवचनात् । न तु कृतब्राह्मणघातः तस्य पतितत्वात् अन्येषामशस्त्रादिहतानाम् । एतच्च शस्त्रहतश्राद्धं विष्ण्वादिभिः सामान्यप्रकरणलिखनात् सकलकृष्णपक्षसाधारणं पित्रादीनामिव पार्व्वणविधिप्रकरणात् पार्व्वणविधिना कार्य्यम् ।
"सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते ।
तत्र तत्र त्रयं कुर्य्याद्वर्ज्जयित्वा मृताहनि ॥"
इति शङ्खवचनाच्च ॥*॥
ननु अन्येषान्तु विगर्हिता इति श्रवणात् । कथं त्रैपुरुषिकपार्व्वणविधिः । न यस्य पुरुषास्त्रय एव शस्त्रहतास्तस्य त्रैपुरुषिकविधिरुपपद्यते । एवं यस्य द्वौ शस्त्रहतावेको वा तेनापि द्वैपुरुषिकैकपुरुषिकं पार्व्वणं कर्त्तव्यम् । यथा, मनुः ।
"पिता यस्य तु वृत्तः स्यात् जीवेच्चापि पितामहः ।
पितुः सनामसङ्कीर्त्त्य कीर्त्तयेत् प्रपितामहम् ॥"
तथा हारीतः ।
"पितामहेऽपि जीवे वै पितर्य्येव समापयेत् ॥"
नन्वेकोद्दिष्टमेव श्रूयते । यथा शङ्खः ।
"सपिण्डीकरणादूर्द्ध्वमृते कृष्णचतुर्द्दशीम् ।
प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत् ॥"
यमः
"सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते ।
एकोद्दिष्टविधानेन तत् कार्य्यं शस्त्रघातिने ॥"
भविष्यपुराणे ।
"समत्वमागतस्यापि पितुः शस्त्रहतस्य च ।
चतुर्द्दश्यान्तु कर्त्तव्यमेकोद्दिष्टं न पार्व्वणम् ॥
चतुर्द्दश्यान्तु यच्छ्राद्धं सपिण्डीकरणे कृते ।
एकोद्दिष्टविधानेन तत्कार्य्यं शस्त्रघातिने ॥"*॥
उच्यते । एषां वचनानाममूलकत्वात् समूलत्वेऽपि पार्व्वणाशक्तविषयाण्येतानि विष्ण्वादिवचनेषु पार्व्वणावगतेः । भ्रात्रादीनान्तु शस्त्रहतानामेकोद्दिष्टविधिना कार्य्यम् ।
"अपुत्त्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये ।
तेषामपि च देयं स्यादेकोद्दिष्टं न पार्व्वणम् ॥
इत्यापस्तम्बवचनेन पार्व्वणनिषेधात् । तच्च न सकलकृष्णपक्षसाधारणं विष्ण्वादिवचनेषु श्राद्धशब्दस्य पार्व्वणपरत्वोक्तेः । किन्त्वाश्विनमासीयकृष्णपक्षविषयम् । ब्रह्मपुराणे प्रायोऽनशनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधाय आश्विने । तर्पणीयाश्चतुर्द्दश्यां लुप्तपिण्डोदकक्रिया । इति यत् पुनरभिधानं तच्छस्त्रहतभ्रात्रादिविषयं अतएव तत्रैवामावास्यायां पितरः पूज्या नान्दीमुखा अपीति वृद्धप्रपितामहादीनामपि श्राद्धं दर्शितम् । इयञ्च चतुर्द्दश्यामशस्त्रहतश्राद्धनिन्दा आश्विनमासीयपक्षश्राद्धादिकल्पव्यतिरिक्तसामान्यकृष्णपक्षविहितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्धकर्म्मभेदात् सामान्यविशेषन्यायात् इतरथा चतुर्द्दश्यां संक्रान्तिश्राद्धेऽशस्त्रहतनिन्दा स्यात्। अतएव कृष्णपक्षे दशम्यादौ वर्ज्जयित्वा चतुर्द्दशीमिति मनुवचनेऽपि चतुर्द्दशीवर्ज्जनं पक्षश्राद्धादिव्यतिरिक्तश्राद्धविषयम् ॥ * ॥ ननु शस्त्रादिहतानां श्राद्धनिषेधः श्रूयते । तथा छागलेयः ।
"शस्त्रविप्रहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः ।
आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत् ॥"
सत्यं बुद्धिपूर्व्वहतानामेव । प्रमादमृतानान्तु श्राद्धादिकमाहाङ्गिराः ।
"अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिभिः ।
अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया ॥"
अबुद्धिपूर्व्वमपि शृङ्ग्यादिभिः क्रीडां कुर्व्वतां मृतानां न कर्त्तव्यम् । यथा, ब्रह्मपुराणम् ।
"शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः ।
आदरात् परिहर्त्तव्यः कुर्व्वन् क्रीडां मृतस्तु यः ॥"
परिहर्त्तव्यः श्राद्धादौ शास्त्रानुमत्या बुद्धिपूर्व्वमृतानामपि कर्त्तव्यम् । यथाह वृद्धगार्ग्यः ।
"वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः ।
आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनादिभिः ॥
तस्य त्रिरात्रमशौचं द्वितीये त्वस्थिसञ्चयः ।
तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते ॥"
एवं क्रीड़ाव्यतिरिक्तेष्वबुद्धिपूर्व्वं मृताः शास्त्रानुमत्या बुद्धिपूर्व्वकमृता अपि श्राद्धार्हाः कथं लुप्तपिण्डोदकत्वमिति चेत् गौणमिति ब्रूमः । बुद्धिपूर्व्वं पिण्डोदकक्रियालोपादिति । इति श्राद्धविवेकः ॥

शस्त्रहस्तः, पुं, शस्त्रं हस्ते यस्य सः । इति शस्त्रपाणिशब्ददर्शनात् ॥

शस्त्राजीवः, त्रि, (शस्त्रेण आजीवतीति । आ + जीव + अच् ।) असिजीवी । तत्पर्य्यायः । काण्डपृष्ठः २ आयुधीयः ३ आयुधिकः ४ । इत्यमरः ॥ काण्डस्पृष्टः ५ । इति तट्टीका ॥ काण्डपृष्टः ६ शस्त्रधारणजीवकः ७ । इति शब्दरत्नावली ॥

शस्त्राभ्यासः, पुं, (शस्त्राणां अभ्यासः ।) अस्त्रशिक्षा । तत्पर्य्यायः । खुरली २ । इति त्रिकाण्डशेषः ॥

शस्त्रायसं, क्ली, (शस्त्रार्थं यदायसम् ।) लोहम् । इति राजनिर्घण्टः ॥

शस्त्री, स्त्री, (शस् + ष्ट्रन् । स्त्रियां ङीप् ।) छुरिका । इति मेदिनी ॥ (यथा, माघे ।४।४४।
"शस्त्रीश्यामैरंशुभिराशुद्रुतमम्भ-
श्छायामृच्छति नीली सलिलस्य ॥")

शस्त्री [न्] त्रि, शस्त्रविशिष्टः । शस्त्रधारी । शस्त्रशब्दादिन्प्रत्ययेन निष्पन्नमेतत् ॥ (यथा, कामन्दकीयनीतिसारे । ७ । ३७ ।
"आप्तशस्त्रानुगतः प्रविशेच्च
सङ्कटेषु गहनेषु न तिष्ठेत् ॥")

शस्पं, क्ली, बालतृणम् । इत्यमरटीकायां भरतः ॥ प्रतिभाहानिः । इति जटाधरः ॥

शस्यं, क्ली, (शस + "तकिशसिचतियतीति ।" ३।१।९७। इत्यस्य वार्त्तिकोक्त्या यत् ।) वृक्षादिनिष्पन्नम् । तत्पर्य्यायः । फलम् २ । इत्यमरः ॥ वृक्षाणां लतादीनाञ्च फलं निष्पन्नत्वमागतं आम्रादिकं शस्यं सस्यपदवाच्यं इत्यन्वयः । फलति निष्पद्यते फलं फलनिष्पत्तौ पचादित्वादच् । सस्ति स्वपिति सस्यं सस लु र स्वप्ने कृद्धोरिति यः सस्यं द्विदन्त्यम् । ग्राम्यकविकथानुबन्ध इव नीरसस्यमनोहरो देश इति नलदमन्तीश्लेषात् ।
"अंसनं सीसकं सस्यं अस्तं सास्ता च सास्वसम् ॥"
इत्युष्मविवेकाच्च ॥ तालव्यादिदन्त्यान्तञ्च तथा हि शसु हिंसायामित्यस्मात् कृद्य सृजेति क्वचिदपि यत् शस्यं तत् क्रियावाच्येऽपि फलेऽपि दृश्यते । तालव्या अपि दन्त्याश्च शस्यशूकरपांशव इत्युष्मभेदः । इति तट्टीकायां भरतः ॥*॥ क्षेत्रस्थधान्यादि । यथा,—
"शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते ।